संस्कृत-वार्ता:

30.05.2025

सायम् :- 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य समग्रविकासाय द्विगुणितचालकशक्तियुतौ-सर्वकारौ निरन्तरं प्रयतमानौ स्तः इति अवदत्, अवसरेऽस्मिन् अद्य अष्टचत्वारिंशत् सहस्रकोटिरूप्यकाणां विकासपरियोजनाः च सः उद्घाटितवान्।

· केन्द्रीयगृहमन्त्री अमितशाहः अद्य जम्मू-कश्मीरस्य पुँछ-क्षेत्रे आतंक-प्रभावितेभ्यः परिवारेभ्यः आर्थिकसहायतां वितरितवान्, आक्रमणे मृतानां परिजनेभ्यः नियुक्तिपत्राणि अपि वितरितवान्।

· अद्य सप्तदश महिला-कैडेट् इत्येतासां प्रथम-समूहः भारतीयसशस्त्रसेनायाम् अधिकारीत्वेन नियुक्तिं लब्धवान्।

· सर्वोच्चन्यायालयेन अद्य निर्दिष्टं यत् स्नातकोत्तरीया पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य (NEET-PG) इति राष्ट्रियपात्रता-सह-प्रवेशपरीक्षा, एकस्मिन्नेव चक्रे करणीयेति।

· अमेरिकादेशेन घोषितं यत् इजरायल् गाजादेशौ षष्टी-दिवसीययुद्धविरामप्रस्तावाय सहमतौ स्तः इति।

· आई.पी.एल. इत्याख्यायां विंशतिं प्रति विंशतिः इति क्रिकेट स्पर्धा-मालिकायाम् अद्य सायंकाले चण्डीगढ़स्य महाराजा-यादविन्द्र-सिंह-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे मुम्बई-इण्डियंस-दलं गुजरात-टायटन्स दलेन सह स्पर्धिष्यते।

<u>प्रधानमन्त्री-बिहार/उत्तरप्रदेश:</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य अनेकाः मितव्ययी-विकास-परियोजनाः उद्घाटिताः घोषिताश्च। जनसमूहं संबोधयन् बिहारस्य समग्रविकासाय द्विगुणितचालकशक्तियुतौ-सर्वकारौ निरन्तरं प्रयतमानौ स्तः इति प्रधानमन्त्री अवदत्। अवसरेऽस्मिन् अद्य सहस्रकोटिरूप्यकाणां विकासपरियोजनाः उद्घाटयन् सः अवदत् यत्

बिहार्-राज्ये काङ्ग्रेस्-पक्षस्य, आर्. जे. डी.-पक्षस्य च नेतृत्वे पूर्वतनानां सर्वकाराणां प्रधानमन्त्री निन्दाम् अकरोत्। श्रीमोदी तर्कं दत्तवान् यत् सामाजिक-न्यायस्य मिथ्यया आर्. जे. डी.-पक्षः निर्धनानां अनुन्नतानां च समुदायानां शोषणम् अकरोदिति।

आपरेशन् सिन्दूर् इत्यस्य विषये प्रधानमन्त्रिणा दृढीकृतं यत् भयोत्पादनं विरुध्य भारतस्य सङ्घर्षः अविच्छिन्नः अस्ति, कदापि न समाप्तः भविष्यति। सः अवदत् यत् देशस्य शत्रुः, कस्मिन्नपि रूपे भवतु, भवतु नाम समुद्रीय-भयोत्पादकत्वेन उतो वा नक्सल्-वादित्वेन वा, शीघ्रमेव ते निर्णायकरूपेण व्यवहृष्यन्ते इति सुनिश्चितमस्ति।

उत्तरप्रदेशस्य कानपुरनगरे अद्य अपराह्णे प्रधानमन्त्री नरेन्द्रमोदी प्रायः सार्द्ध-सप्त-चत्वारिंशत्सहस्र-कोटिरूप्यकाणां पञ्चदश बृहद्विकासपरियोजनानां उद्घाटनं शिलान्यासं च कृतवान्। सः चुन्नीगञ्ज-नयागञ्जयोः मध्ये कानपुर-मेट्रो-रेलयानस्य नूतन-वीथ्याः अपि हरितध्वजप्रदर्शनपूर्वकं शुभारम्भं कृतवान्। एका सभा च सम्बोधयता प्रधानमन्त्रिणा उक्तं यत् सम्पूर्णः संसारः स्त्रीणां क्रोधं, पीडां च सिन्दूराभियान रूपेण दृष्टवान्, भारतेन पाकिस्तानस्य अनेकानि आतङ्ककेन्द्राणि पूर्णतया विनष्टी कृतानि।

<u>जम्मू-कश्मीर-शाह-यात्रा-</u>

केन्द्रीयगृहमन्त्री अमितशाहः अद्य जम्मू-कश्मीरस्य पुँछ-क्षेत्रस्य भ्रमणं कृत्वा सिन्दूराभियानावधौ पाकिस्तानेन कृताक्रमणानन्तरं सीमक्षेत्रस्य सम्पत्ति-धार्मिकस्थानेषु क्षतेः प्रथमं मूल्यांकनं कृतवान्। गृहमन्त्री उपराज्यपालमनोजसिन्हा, वरिष्ठाधिकारिभिः, शीर्षसुरक्षाकर्मचारिभिश्च सह डाकबंगला इत्यत्र पाकाक्रमणे प्रभावितपरिवारैः सह मिलित्वा तेषां समाह्वानान् श्रुत्वा शोकसंवेदनां प्रकटितवान्। गृहमन्त्री प्रभावितेभ्यः परिवारेभ्यः आर्थिकसहायतां वितरितवान्, आक्रमणे मृतानां परिजनेभ्यः नियुक्तिपत्राणि अपि वितरितवान्। आयोजने केन्द्रीयगृहमन्त्री अमितशाहः अवदत् यत् पाकिस्तानेन जम्मू-कश्मीरयोः नागरिकक्षेत्राणि लक्षीकृतानि यस्य सम्पूर्णविश्वेन निन्दा कृता।

पुणे-महिला कैडेट् :

देशस्य सैन्येतिहासस्य एकस्मिन् महत्त्वपूर्णे क्षणे अद्य सप्तदश महिला: त्रिशततोप्यधिकैः पुरुष-कैडेट इत्येतैः सह भारतीयसशस्त्रसेनायाम् अधिकारीत्वेन नियुक्तिं लब्धवत्यः। अद्य प्रातः पुणेनगरस्य प्रतिष्ठितस्य खेत्रपालोद्याने राष्ट्रियरक्षा-अकादम्याः अष्टचत्वारिंशदुत्तरैकशततमे पासिंग् आउट् परैड् इत्याख्ये समावर्तनीय-पथसंचलने ताः अपि प्रातिभाग्यम् अभजन्। वार्ताहरैः सह चर्चायां दलस्य सदस्यया हरसिमरन् कौर इत्यनया उक्तं यत् सा वस्तुतः जेईई मेन्स् इत्यस्यां परीक्षायां संलग्नासीत् परं ततः एनडीए प्रतियोगी-परीक्षा आशीर्वादरूपेणागतेति।

SC (NEET-PG)

सर्वोच्चन्यायालयेन अद्य निर्दिष्टं यत् स्नातकोत्तरीया पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य (NEET-PG) इति राष्ट्रियपात्रता-सह-प्रवेशपरीक्षा, द्वयोः चक्रयोः न अपितु एकस्मिन्नेव चक्रे करणीयममिति। न्यायाधीशस्य विक्रमनाथस्य नेतृत्वे पीठेन प्राधिकारिभ्यः निर्देशः प्रदत्तः यत् सम्पूर्णप्रक्रियायां पूर्णपारदर्शिता च भवेदिति सुनिश्चितं कुर्वन्त्विति।

अमेरिका - इजरायल् गाजा युद्धविरामः -

अमेरिकादेशेन घोषितं यत् इजरायल् गाजादेशौ षष्टी-दिवसीययुद्धविरामप्रस्तावाय सहमतौ स्तः इति, यद्यपि तयोः सैन्यगतिविधयः युद्धग्रस्तक्षेत्रे नैरन्तर्येण प्रचलन्तीति। व्हाइट हाउस-इत्यस्य वार्तासचिवः कैरोलिन् लीविट् इत्यनेन वार्ताहरान् सम्बोधयन् पुष्टिः कृता।

सर्वदलीयाः प्रतिनिधयः

भयोत्पादनस्य निर्मूलनार्थं भारतस्य दृढप्रतिबद्धतायाः निदर्शनरूपेण, सप्त बहुदलीयसंसदीयप्रतिनिधयः विदेशेषु आधिकारिकयात्रायां उच्चस्तरीयचर्चासु च सँल्लग्नाः सन्ति। जे. डी. (यू.) इत्यस्य सांसदस्य सञ्जय् झा इत्यस्य नेतृत्वे बहु-पक्षीय-प्रतिनिधिमण्डलम् सम्प्रति इण्डोनेशिया-देशे अस्ति, यत्र मण्डलमिदं अनेकानि सम्मेलनानि अकरोत्, इण्डोनेशिया-देशस्य जकार्ता-नगरे मुख्यालययुक्ताधिकारिभिस्सह, विश्वविद्यालयानां शिक्षाविदैः, शोधकैश्च सह अनेन

दलेन मेलनं कृतम्। प्रतिनिधिमण्डलं जकार्ता-नगरे नह्दलतुल्-उलमा इत्यस्य कार्यकारि-मण्डलस्य अध्यक्षेण के. एच्. उलिल् अब्शर् अब्दल्ला इत्यनेन सह अपि मिलितवत्। प्रतिनिधिमण्डलस्य सदस्यः काङ्ग्रेस्-पक्षस्य नेता सल्मान् खुर्षिद् इत्येषः प्रसारमाध्यमैः सह सँल्लापे अवदत् यत् इण्डोनेशिया-देशः भयोत्पादनं विरुध्य भारतस्य स्थितिं समर्थयतीति।

नह्दलातुल्-उलमा इत्यस्य कार्यकारि-मण्डलाध्यक्षः अवदत् यत् भारत-इण्डोनेशिया-देशौ आतङ्कवादस्य समस्यां सम्मुखीकृतवन्तौ, तथा च भारतीयप्रतिनिधिसङ्घेन सह उग्रवादस्य समस्यां समापयितुं स्वानुभवान् व्यञ्जयञ्चेति।

काङ्ग्रेस्-सदस्यस्य शशि तरूर् इत्यस्य नेतृत्वे सर्वपक्षाणां संसदीयप्रतिनिधिसङ्घः अद्य प्रातः कोलम्बिया-देशस्य राजधान्यां बोगोटा-नगरे प्रसारमाध्यमान् सम्बोधयत्। अस्मिन् अवसरे भाषणं कुर्वन्, श्री. थरूर्-वर्यः अवदत् यत् आततायिनां प्रेषकाणां, तेषां प्रतिरोधकाणाञ्च मध्ये समता न भवेदिति।

राजनाथसिंहः/मिनीरत्नम्

रक्षामन्त्रालयेन म्यूनिषन्स् इण्डिया लिमिटेड् (एम्. ऐ. एल्.) आर्मर्ड् वेहिकल्स् निगम् लिमिटेड् (ए. वि. एन्. एल्.) तथा इण्डिया आप्टेल् लिमिटेड् (ऐ. ओ. एल्.) इत्येतेभ्यः मिनीरत्नेति श्रेण्यां-प्राथम्यं दत्तम्। रक्षामन्त्री राजनाथसिंहः, त्रिभ्यः सार्वजनिकरक्षोद्यो-विशेषेभ्यः, तेषां सर्वकारीय-संस्थानां कार्पोरेट् इति संस्थानत्वेन परिवर्तनानन्तरं, वर्षत्रयात्मके अल्पकाले एव लाभोत्पादनाय तेषां अभिनन्दनमपि अकरोत्।

IMD WEATHER :

भारतर्तुविज्ञानविभागेन आगामिषु सप्तदिनेषु देशस्य उत्तर-पूर्व-भागे वर्षायाः पूर्वानुमानं कृतमस्ति। विभगानुसारी हिमाचलप्रदेशे, उत्तराखण्डे, पञ्जाबे, हरियाणायां, चण्डीगढे, दिल्ल्यां चापि एतादृशी परिस्थितिः जून मासस्य तृतीय-दिनाङ्क पर्यन्तं दृश्यते। ऋतु-विभागेन पश्चिमबङ्गे, बिहारे, ओडिशायां, तमिलनाडु राज्ये, पुडुचेर्यां, कडाईकले, तटीय कर्नाटके केरले, माहे इत्येतेषु अतिवृष्टेः प्रचण्डवृष्टेः च सम्भावना प्रकटितास्ति।

आईपीएल

आई.पी.एल. इत्याख्यायां विंशतिं प्रति विंशतिः इति क्रिकेट स्पर्धा-मालिकायाम् अद्य सायंकाले चण्डीगढ़स्य महाराजा-यादविन्द्र-सिंह-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे मुम्बई-इण्डियंस-दलं गुजरात-टायटन्स दलेन सह स्पर्धिष्यते। गतरात्रौ रॉयल चैलेंजर्स बैंगलुरू दलेन प्रथम साफल्ये पञ्जाब किंग्स दलं अष्ट क्रीडकाणामवशेष- पुरस्सरं पराजित्य श्रृङ्खलायाः अन्तिम-चरणे प्रवेशो लब्धः।

इति वार्ता: